दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णतृतीया
ज्येष्ठ २० प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-६ ■ वर्ष-५ ■ अङ्क-२२१ | १ | जून ०३, २०२६ | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

२ विज्ञान-प्रौद्योगिकी-मंत्री डॉ. जितेंद्र सिंहः जर्मनीदेशस्य थुरिंगिया इत्यस्य मंत्री-राष्ट्रपतिः मारियो-वोग्ट इत्यनेन चर्चितवान्

३ विश्वपर्यावरणदिवसस्य पूर्वसन्ध्यायां 'संस्कृतवाङ्मये पर्यावरणचिन्तनम्' इति विषये राष्ट्रियसङ्गोष्ठ्याः आयोजनम्

६ संस्कृतम्, देवनागरी अक्षरपरम्परा भारतीयं शैलीविज्ञानम् अक्षरसौन्दर्यस्य च परम्परा

## केन्द्रसर्वकारेण आव्रजननियमे विदेश-नियमेषु च संशोधनं अधिसूचितम्



केन्द्रसर्वकारेण आव्रजननियमे विदेश-नियमेषु च संशोधनं अधिसूचितम् अस्ति । नियमानुसारं, भारते अशीत्यधिकैकशतं दिनानि यावत् आगम्यमानाः वैदेशिकाः यदि स्वकीयं प्रवास-समयं वर्धयितुमिच्छन्ति तर्हि तेभ्यः आव्रजनावधेः समाप्तिपूर्वम् एव पञ्जीकरणम् अनिवार्यम् अस्ति । इतः पूर्व, अशीत्यधिकैकशतं दिनानाम् अवधेः समाप्त्यनन्तरं चतुर्दशदिनाभ्यन्तरं पञ्जीकरणम् आवश्यकम् आसीत् । गृहमंत्रालयेन आव्रजन-विदेशी-नियमः इत्येषा अधिसूचना निर्गता अस्ति यस्यां आव्रजन-विदेशीनियमः इत्यस्यान्तर्गतं पंजीकरणसीमायां समयसीमा अध्यर्थनातंत्रे च महत्वपूर्णानि परिवर्तनानि कृतानि सन्ति । यद्यपि, निर्धारितावधेः अनन्तरं पञ्जीकरणं केवलं आपत्काल-परिस्थितिषु एव स्वीकार्यं भविष्यति । प्रथमवारं, नियमेषु अन्तर्जालमाध्यमेन अध्यर्थनाप्रणालिः योजिता अस्ति । केनापि आदेशेन प्रभावितः जनः अधुना आव्रजनविभागायुक्तम् अन्तर्जालमाध्यमेन प्रार्थयितुं शक्नोति । अध्यर्थना आदेशप्राप्तिसमयात् त्रिंशदिनानाम् अभ्यन्तरम् एव कुर्यात् । आयुक्तः संबंधितपक्षं संश्रुत्य निर्णयं दास्यति अपि च विषयस्य समाधानं षष्टिदिनानाम् अभ्यन्तरं एव कुर्यात् ।

## भारतस्य मुख्यन्यायाधीशः सर्वोच्चन्यायालयस्य पञ्चन्यायाधीशेभ्यः पदस्य शपथवचनं प्रायच्छत्



भारतस्य मुख्यन्यायाधीशः न्यायमूर्तिः सूर्यकान्तः इत्यसौ गतदिने सर्वोच्चन्यायालयस्य पञ्चन्यायाधीशेभ्यः पदस्य शपथवचनं प्रायच्छत् । न्यायमूर्तिः शीलनागू, श्रीचंद्रशेखरः, संजीवसचदेवा, अरुणपल्ली, वरिष्ठाधिवक्त्री वी. मोहना च सर्वोच्चन्यायालयस्य न्यायाधीशत्वेन शपथवचनं स्वीकृतवन्तः । अवधेयं यत् केन्द्रेण सर्वोच्चन्यायालय-कॉलेजियम इत्यस्य अनुशंसां पालयता ह्यः एव एतेषां नियुक्तिविषयिकी स्वीकृतिः प्रदत्ता । एताः नियुक्तयः राष्ट्रपतिना द्रौपदीमुर्मुवर्यया सर्वोच्चन्यायालय-संशोधन अध्यादेशः इत्यस्य प्रतिष्ठापनानन्तरं कृताः सन्ति । अधुना भारतस्य मुख्यन्यायाधीशेन सह सर्वोच्चन्यायालये न्यायाधीशानां स्वीकृता संख्या चतुस्त्रिंशत्तः समेध्य अष्टत्रिंशत् यावत् कृता अस्ति ।

## राष्ट्रीय-पंचायत-पुरस्कार-समारोहः अद्य नवदिल्ल्याम् आयोजिष्यते

राष्ट्रीय-पंचायत-पुरस्कार-समारोहः अद्य नवदिल्ल्याम् आयोजिष्यते । एते पुरस्काराः देशस्य द्वाचत्वारिं-शत्संख्याकेभ्यः उत्कृष्ट-पंचायतेभ्यः प्रदास्यन्ते । समारोहावधौ, चतुस्त्रिंशत्-ग्रामपंचायतेभ्यः, दीन-दयाल उपाध्याय-पंचायत-सतत-विकास-पुरस्कारः इत्यस्याम् श्रेण्यां नानाजी-देशमुख-सर्वोत्तम-पंचायत-सतत-विकास-पुरस्कार-श्रेण्यां च अष्ट-पंचायतेभ्यः पुरस्काराः प्रदास्यन्ते । प्राप्तपुरस्काराः पंचायत-प्रमुखाः स्वकीयाः सर्वोत्तम-कार्यप्रणालीः उपलब्धीन् चाधिकृत्य प्रस्तुतिं दास्यन्ति ।

## शिक्षा सशक्तीकरणस्य महत्वपूर्णं साधन विद्यते अपि च

### वास्तविकविकासः तदैव सम्यग्रूपेण प्राप्स्यते यदा समाजस्य सर्वे एव पक्षाः सामाजिकेन, आर्थिकेन, शैक्षिकन च रूपेण विकसहिताः भविष्यन्ति



राष्ट्रपतिना द्रौपद-मुर्मु-वर्यया प्रोक्तं यत् शिक्षा सशक्तीकरणस्य महत्वपूर्णं साधन विद्यते । शिक्षा एव जनान आत्मनिर्भर, जागरुकः, सक्षमश्च कारयति । गतदिने नवदिल्ल्याम् असौ जनजातीय छात्रवृत्ति-लाभार्थिनः सम्बोधयति स्म। अस्मिनवसरे सा प्रोक्तवती यतः वास्तविकविकासः तदैव सम्यग्रूपेण प्राप्स्यते यदा समाजस्य सर्वे एव पक्षाः सामाजिकेन, आर्थिकन, शैक्षिकन च रूपेण विकसिताः भविष्यन्ति ।सा रेखाङ्कितवती यत् सर्वकारस्य छात्रवृत्तियोजनया जनजातिवर्गेभ्यः उच्चशिक्षायाः अवसराणां च प्रदानेन तेषां जीवनं परिवर्तितम् । द्रौपदीमुर्मुवर्या अकथयत् यत् भारते प्रतिभासम्पन्नानां नैयून्यं न अस्ति अपि तु तेषाम् अभिज्ञानं, पोषणं, तेभ्यः उचितमार्गदर्शनप्रदानं च आवश्यकम् अस्ति ।

## भारतीय-ऋतुविज्ञानविभागः इत्यनेन गर्जनेन विद्युत्तरङ्गचमत्कृतेन च सह झञ्झावातस्य सञ्चेतना प्रवर्तिता

भारतीय-ऋतुविज्ञानविभागः इत्यनेन राजस्थान, गुजरात, पश्चिम-मध्य-प्रदेश, ओडिशा, आंध्रप्रदेशस्य तटवर्तिक्षेत्रेषु दिनसमये गर्जनेन विद्युत्तरङ्गचमत्कृतेन च सह झञ्झावातस्य सञ्चेतना प्रवर्तिता अस्ति । कर्नाटकस्य आन्तरिकक्षेत्राणि, केरलम्, माहे, लक्षद्वीप, तमिलनाडु, पुडुचेरी, कराईकल चेत्यादिषु क्षेत्रेषु श्वः यावत् तीव्रवृष्टिः भविष्यति । आगामिषु दिवसत्रयेषु हरियाणा, चंडीगढ़, दिल्ली, छत्तीसगढ़, झारखंड, गुजरात, गोवा, महाराष्ट्र, आंध्रप्रदेश, तेलंगाना पश्चिम-उत्तरप्रदेश प्रभृतिषु क्षेत्रेषु तीव्रझञ्झावातेन सह गर्जनस्य विद्युत्तरङ्गचमत्कृतस्य च संभावना वर्तते ।

## सुभाषितम्

**शरीरस्य गुणानां च, दूरमत्यन्तमन्तरम्।**
**शरीरं क्षणविध्वंसि, कल्पान्तस्थायिनो गुणाः।।**

भावार्थः- शरीर तथा दया आदि गुणों में बड़ा अन्तर है। शरीर तो क्षणभंगुर है और गुण कल्प के अन्त तक रहने वाले हैं।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## यूपीआई इत्यनेन विगतमासे त्रयोविंशति-दशमलव-विंशति-अर्बुदरुप्यकाणाम् आदानप्रदानविषयकं शिखरं समावाप्तम्

यूनिफाइड-पेमेंट्स-इंटरफेस् (यूपीआई) इत्यनेन विगतमासे त्रयोविंशति-दशमलव-विंशति-अर्बुदरुप्यकाणाम् आदानप्रदान-विषयकं शिखरं समावाप्तम् । वित्तीय-सेवा-विभागः सार्वजनिक-संदेशमाध्यमे लिखिते संदेशे डिजिटल इति रूपेण धनादानप्रदानं स्वीकर्तुं नागरिकान् प्रति आभार व्यक्तीकृतवान् । अवधेयं यत् यूपीआई इत्येतत् प्रकल्पं विश्वस्य सर्वोच्चत्वेन रीयल-टाइम-पेमेंट इति प्रकल्परूपेण समुद्भूतम् अस्ति यत् देशस्य डिजिटल अर्थव्यवस्थायाः आधारः वर्तते ।

# विज्ञान-प्रौद्योगिकी-मंत्री डॉ. जितेंद्र सिंहः जर्मनीदेशस्य थुरिंगिया इत्यस्य मंत्री-राष्ट्रपतिः मारियो-वोग्ट इत्यनेन चर्चितवान्



विज्ञान-प्रौद्योगिकी-मंत्री डॉ. जितेंद्र सिंहः जर्मनीदेशस्य थुरिंगिया इत्यस्य मंत्री-राष्ट्रपतिः मारियो-वोग्ट इत्यसौ च गतदिने नवदिल्ल्यां क्वांटम-संचारस्य, फोटोनिक्स इत्यस्य, उद्योग-नेतृत्वभूतस्य डीप-टेकसहयोगस्य च विषये चर्चितवन्तौ । अस्मिन् अवसरे भाषमाणः डॉ. सिंहवर्यः अकथयत् यत् गतदिने देशः विश्वस्य तृतीयस्य सर्वोच्च-स्टार्टअप-इकोसिस्टम इत्यस्य अध्यक्षतां करोति अपि च जैव-प्रौद्योगिकी, स्वास्थ्य-सेवा, जल-प्रौद्योगिकी, कृत्रिम बुद्धिमत्ता, अंतरिक्ष प्रौद्योगिकी चेत्यादिषु क्षेत्रेषु अन्तराष्ट्रियसहयोगस्य महत्वपूर्णावसरान् प्रयच्छति । डॉ. सिंहः अकथयत् यत् भारत-जर्मनीदेशौ विज्ञान, प्रौद्योगिकी, नवाचार, जन-संबंध चेत्यादिषु विषयेषु एकस्य सुदृढसहयोगस्य आदनप्रदाने कुरुतः ।

# अगस्त्यमलाई-संरक्षितक्षेत्रेषु अतिक्रमणविषये सर्वोच्चन्यायालयेन संज्ञानं ग्रहीतम्




तमिलनाडु-केरलराज्ययोः अगस्त्यमलाई पारिस्थितिक-परिदृश्यम् इत्यस्य संरक्षितक्षेत्रेषु अतिक्रमणम् अधिकृत्य गम्भीर-संज्ञानम् अङ्गीकुर्वन्, सर्वोच्चन्यायालयः एकां समयबद्ध-अतिक्रमण-मुक्ति-योजनां निर्मातुं तां च प्राथमिकाधाररूपेण प्रतिष्ठापयितुं च निर्देशं प्रायच्छत् । सर्वोच्चन्यायालयः अतिक्रमणं कुर्वन्तः सर्वान् अष्टादशाधिकैकशतम् सेवानिवृतान् सर्वकारीयकर्मचारिणः विरुध्य अनुशासनात्मकं वैधानिकं च कार्याचरणं प्रवर्तयितुम् आदेशं न्यायमूर्तिः विक्रमनाथः संदीपमेहता इत्यनयोः पीठेन प्रोक्तं प्रायच्छत् । यत् मद्रास उच्च-न्यायालयेन प्रवर्तितानां विशिष्ट-निर्देशानां सर्वोच्चन्यायालयेन पारितादेशानां च अनन्तरम् अपि, अगस्त्यमलाई-संरक्षित-क्षेत्रेषु अतिक्रमणं अनेकेभ्यः दशकेभ्यः यथापूर्व प्रवर्तमानम् अस्ति । पीठेन प्रोक्तं यत् अतिक्रमणमुक्तियोजनायां भौतिकातिक्रमणम् अपाकर्तु, अतिक्रमणकारिणः च विरुध्य वैधानिककार्याचरणम् अतिक्रमणस्य अपाकरणानन्तरं पारिस्थितिकपुनर्निवासस्य च व्यापकाः उपायाः सम्मिलिताः स्युः ।

# वञ्चितबालकानां शिक्षायै 'टोग्लेन्-ट्रस्ट' इत्यस्य साहाय्यं करिष्यति सर्वकारः; शिमलायां ट्रस्ट-प्रतिनिधिमण्डलेन सह मेलनावसरे मुख्यमन्त्रिणः आश्वासनम्



**हिमसंस्कृतवार्ताः - शिमला।** 'टोग्लेन्-ट्रस्ट धर्मशाला' इत्यस्य एकं प्रतिनिधिमण्डलं सोमवासरे ट्रस्ट-निदेशकस्य थेरचिन्-ग्याल्तसेन्-महोदयस्य नेतृत्वे मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खू-महोदयेन सह अमिलत्। प्रतिनिधिमण्डलेन मुख्यमन्त्रये ट्रस्ट-द्वारा सञ्चालितविद्यालयस्य कृते भूमिपट्टाधिकारस्य (लीज़) याचनम् विज्ञापितम्। एषः विद्यालयः वञ्चितेभ्यः निराश्रितेभ्यः च बालकेभ्यः शिक्षां प्रददाति। मुख्यमन्त्री प्रतिनिधिमण्डलाय राज्यसर्वकारस्य पक्षतः सर्वसंभव-सहयोगस्य आश्वासनं दत्तवान्। तेन प्रकथितं यत् १४ वर्षाणाम् अपेक्षया न्यूनवयस्केभ्यः छात्रेभ्यः प्रतिमासं १,००० रूप्यकाणां तथा च १४ वर्षाणाम् अपेक्षया अधिकवयस्केभ्यः छात्रेभ्यः २५०० रूप्यकाणां प्रतिमासं वित्तीयसाहाय्यं प्रदास्यते।

मुख्यमन्त्री वञ्चितानां सर्वहाराणां च बालकानां कल्याणाय ट्रस्ट-द्वारा क्रियमाणानां समर्पितप्रयासानां भृशं प्रशंसां कुर्वन् अवदत् यत् शिक्षायाः मानवीयसेवाशृङ्खलायाः च क्षेत्रे ईदृशाः प्रयासाः समाजस्य दुर्बलवर्गाणां सशक्तीकरणे प्रमुखां भूमिकां निर्वहन्ति। अस्मिन् अवसरे राजस्वमन्त्री जगतसिंहनेगी, विधायकः हरीशजनारथा, ट्रस्टी-दोरजे तथा च पार्षदः पलकितनेगी अपि उपस्थिताः आसन्।

# जनगणना २०२७- १५ जूनपर्यन्तं स्वयं पूरयन्तु स्वविवरणम्; मुख्यमन्त्रिणा प्रदेशवासिभ्यः सहभागितां निश्चितं कर्तुं कथितम्



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः गतदिने जनगणना-२०२७ इत्यस्याः अन्तर्गतं प्रचलति स्वगणना-अभियाने (सेल्फ एन्यूमरेशन) भागं गृहीतवान्, अन्तर्जाल-जालाधारस्य (ऑनलाइन पोर्टल) se.census.gov.in माध्यमेन च जनगणनासम्बद्धां स्वकीयां सूचनां पञ्जीकृतवान्। अस्मिन् अवसरे हिमाचलप्रदेशस्य जनगणना-सञ्चालन-निदेशिका दीपशिखाशर्मा विभागस्य वरिष्ठाः अधिकारिणश्च मुख्यमन्त्रिणं अङ्कीय-जनगणनायाः (डिजिटल जनगणना) प्रक्रियायाः, अस्याः प्रमुखाणां वैशिष्ट्यानां तथा च नागरिकेभ्यः उपलभ्यमानसुविधानां विस्तीर्णां सूचनाम् दत्तवन्तः। मुख्यमन्त्री प्रदेशवासिभ्यः अस्मिन् महति राष्ट्रिय-अभियाने सक्रियरूपेण भागं ग्रहीतुं १५ जून २०२६ पर्यन्तं स्वकीयां स्वगणनां पूर्णं कर्तुं च संप्रार्थितवान्। तेन प्रतिपादितं यत् जनगणना लोकतान्त्रिकशासनव्यवस्थायाः विकासस्य च आधारशिला वर्तते, या जनसङ्ख्यायाः, परिवाराणां स्थितेः, आवासस्य, संसाधनानां तथा च सार्वजनिकसेवाप्राप्तेः सम्बद्धाः महत्त्वपूर्णाः सूचनाः उपकल्पयति। एतेषाम् एव अङ्कनानाम् आधारेण विकासयोजनाः निर्मीयन्ते तथा च जनकल्याणकारीनीतीनां कार्यक्रमाणां च निर्माणं क्रियते।मुख्यमन्त्रिणा कथितं यत् हिमाचलप्रदेशे जनगणना-२०२७ द्वयोः चरणयोः आयोजयिष्यते। प्रथमः चरणः १६ जून तः १५ जुलाई २०२६ पर्यन्तं सञ्चालयिष्यते, यश्च 'गृहसूचीकरणं तथा आवासजनगणना' इत्यस्य उपरि आधारिता भविष्यति। द्वितीये चरणे जनसङ्ख्यायाः गणना करिष्यते। सः अवदत् यत् अस्मिन् वारे जनगणना पूर्णतः अङ्कीय माध्यमेन (डिजिटल माध्यम) भविष्यति। गणनाकर्तारः (एन्यूमरेटर्स) पर्यवेक्षकाश्च (सुपरवाइजर्स) चलदूरभाष-यन्त्राणां (मोबाइल) माध्यमेन गृहाणां परिवाराणां च सम्बद्धाः सूचनाः सङ्ग्रहीष्यन्ति।मुख्यमन्त्रिणा उक्तं यत् प्रदेशस्य दुर्गमेषु हिमपातप्रभावितेषु क्षेत्रेषु जनसङ्ख्यागणना ११ तः ३० सितम्बर २०२६ पर्यन्तं भविष्यति, यदा तु अन्येषु क्षेत्रेषु एतत् कार्यं ९ तः २८ फरवरी २०२७ तक सम्पन्नं भविष्यति। सः प्रदेशवासिभ्यः अस्य राष्ट्रियमहत्त्वस्य अभियानस्य साफल्याय गणनाकर्तृभ्यः, पर्यवेक्षकेभ्यः अन्येभ्यः च जनगणाधिकारिभ्यः सत्यां पूर्णं च सूचनां प्रदाय सहयोगाय आग्रहं कृतवान्।

# पठानकोट-जोगिन्द्रनगर-रेलसेवा पुनर्स्थापिता, त्रिवर्षात् परं धावितं रेलयानम्; अनुरागठाकुरः हरितध्वजं प्रदर्श्य रेलयानं प्रेषितवान्



**हिमसंस्कृतवार्ताः - काङ्ग्ड़ा।** वर्षत्रयस्य सुदीर्घप्रतीक्षायाः परं पठानकोट-जोगिन्द्रनगर-रेलमार्गे पुनः एकदा रेलयानानां 'छुक्-छुक्' इति ध्वनिः श्रुता। चक्की-सेतोः (चक्की पुल) पुनर्निर्माणस्य परं जोगिन्द्रनगर-पठानकोट-नैरोगेज-मार्गे रेलसेवा पुनर्स्थापिता संजाता। मङ्गलवासरे काङ्ग्ड़ा-जनपदस्य समेला-रेलाधिष्ठाने सांसदः अनुरागठाकुरः, सांसदः डॉ. राजीवभारद्वाजः, विधायकः पवनकाजलः रणवीरसिंहश्च संयुक्तरूपेण रेलयानाय हरितसङ्केतं (हरी झंडी) प्रदर्श्य प्रस्थापितवन्तः। रेलसेवा प्रचलनेन क्षेत्रस्य सहस्रशः यात्रिणः, स्थानीयनिवासिनः पर्यटकाश्च श्वसनसुखं प्राप्वन्तः। क्रमशः ३ पृष्ठे...

# हिमाचल-निर्वाचनम्: मण्डी, धर्मशाला, सोलन नगरनिगमेषु पराजयस्य कारणम् अन्वेषयिष्यति काङ्ग्रेसः, समितयः रचिताः




हिमसंस्कृतवार्ताः- धर्मशाला।हिमाचलप्रदेशकाङ्ग्रेसअध्यक्षः विनयकुमारः मण्डी, धर्मशाला, सोलन नगरनिगमनिर्वाचनेषु पराजयस्य समीक्षां कर्तुं 'फैक्ट फाइंडिंग' (तथ्यान्वेषण) समितीनां गठनं कृतवान् अस्ति। समितिभ्यः निर्वाचनपरिणामैः सम्बद्धानां सर्वेषां पक्षाणां जाञ्च कर्तुं, पार्टीकार्यकर्तृभिः स्थानीयनेतृत्वेन च सह सम्भाषणं कर्तुं, तेषां कारणानां च परिज्ञानं कर्तुं कथितं यैः निर्वाचनपरिणामाः प्रभाविताः अभवन्। प्रदेशसङ्गठनमहामन्त्री विनोद जिंटा एतस्मिन् विषये एताभ्यः समितिभ्यः एकसप्ताहस्य अन्तरे स्वप्रतिवेदनं (रिपोर्ट) प्रदेशकाङ्ग्रेससमित्यै प्रदातुं कथितवान्, यत् तत्कालं प्रभावी अस्ति।

जिंटा महोदयेन उक्तं यत् धर्मशालायै काङ्ग्रेस- उपाध्यक्षः करणसिंह पठानिया संयोजकः कृतः अस्ति, यदा च प्रदेशकाङ्ग्रेससमित्याः महासचिवाः अमित भरमौरी, यशवन्त खन्ना, मनमोहन कटोच च एतस्याः समित्याः सदस्याः नामिताः सन्ति।मण्डी नगरनिगमाय काङ्ग्रेस- उपाध्यक्षः चेतराम ठाकुरः संयोजकः, काङ्ग्रेसमहासचिवाः पवन ठाकुरः, हरिकृष्ण हिमरालः, सत्यजीत नेगी च एतस्याः समित्याः सदस्याः नामिताः। सोलन नगरनिगमे काङ्ग्रेस- उपाध्यक्षः अमित नन्दा संयोजकः, काङ्ग्रेसमहासचिवाः चन्द्रशेखर शर्मा, यशपाल तनाईकः, धर्मेन्द्र धामी च एतस्याः समित्याः सदस्याः नामिताः सन्ति। एतदतिरिक्तं सम्बद्धानां मण्डलानां खण्डानां (ब्लॉक) च सर्वे अध्यक्षाः अपि एतासां समीतीनां सदस्याः नामिताः सन्ति। चतुर्षु मण्डलेषु जनपद्-परिषदां (जिला परिषद) गठनाय काङ्ग्रेसेन पर्यवेक्षकाः नियुक्ताः प्रदेशकाङ्ग्रेस अध्यक्षः विनयकुमारः चम्बा, काङ्गड़ा, लाहौल-स्पीति, शिमला मण्डलेषु जनपदपरिषदां गठनाय समीतीनां गठनं कृतवान् अस्ति। प्रदेशसङ्गठनमहासचिवः विनोद जिंटा अवदत् यत्:

- चम्बा जनपदपरिषद्: अस्य गठनाय विधायकः केवलसिंह पठानिया पर्यवेक्षकः, विधायकः नीरज नैयरः सहपर्यवेक्षकः, काङ्ग्रेसमण्डलाध्यक्षः सुरजीत भरमौरी, दिलदार अली भट्टः, विजय कंवरः च सदस्याः नामिताः सन्ति।

काङ्गड़ा जनपदपरिषद्: अस्य गठनाय प्राविधिक- शिक्षामन्त्री (तकनीकी शिक्षा मंत्री) राजेश धर्माणी पर्यवेक्षकः, सांशदः अनुराग शर्मा च सह- पर्यवेक्षकः नामितः। लाहौलस्पीतिः अत्र विधायिका अनुराधा राणा पर्यवेक्षिका, काङ्ग्रेसमण्डलाध्यक्षः दोरजे अङ्गरूपः सह पर्यवेक्षकः नामितः अस्ति। शिमला जनपदपरिषद्: अस्य गठनार्थं शिक्षामन्त्री रोहित ठाकुरः पर्यवेक्षकः, विधायकः मोहनलाल ब्राक्टा सह पर्यवेक्षकः, रामपुरखण्डाध्यक्षः लालचन्दशर्मा, चौपालखण्डाध्यक्षः डीके चौहानः, ठियोगखण्डाध्यक्षः सञ्जयशर्मा, शिमलाग्रामीण- खण्डाध्यक्षः गोपाल शर्मा च सदस्याः नामिताः सन्ति। एतदतिरिक्तं मण्डलस्य अन्ये सर्वे खण्डाध्यक्षाः अपि एतस्याः समित्याः सदस्याः नामिताः सन्ति।




अगस्त २०२२ तमे वर्षे आगतायाम् प्राकृतिकविपदि (आपदा) पञ्जाब-हिमाचलसीम्नि स्थितः चक्की-नद्याः उपरि निर्मितः रेलाधारसेतुः प्रवाहितः अभवत्। अनेन एतस्मिन् मार्गे रेलसेवा पूर्णतः अवरुद्धा आसीत्। सांसदेन अनुरागठाकुरेण संसूचितं यत् अस्य सेतोः पुनर्निर्माणस्य अभ्यर्थना केन्द्रसर्वकारस्य सम्मुखं प्रमुखाधारेण उत्थापितम् आसीत्। रेलमन्त्रालयेन प्रायः सप्ततिकोटि-रूप्यकाणां (७० करोड़) व्ययेन आधुनिकतन्त्रज्ञानेन सज्जस्य नूतनसेतोः निर्माणं पूर्णं कृतम्। सांसदः डॉ राजीवभारद्वाजः न्यगादीत् यत् पर्वतीयराज्ये रेलविस्तारस्य साक्षात् अर्थः विकासस्य गतिं तीव्रीकरणम् अस्ति। अपरपक्षे, विधायकः पवनकाजलः अवदत् यत् काङ्गड़ा-जनतायाः बहुवर्षीयं प्राचीनं स्वप्नं साकारं जातम्। अस्याः रेलसेवायाः प्रारम्भेण न केवलं पर्यटनं वर्धिष्यते, अपितु स्थानीयव्यापाराय युवभ्यश्च उद्योगस्य नवीनाः अवसराः अपि जनिष्यन्ते। अधुना दैनिकयात्रिभ्यः, छात्रेभ्यः शक्तिपीठानां दर्शनार्थं आगच्छद्भ्यः अन्यराज्याणां श्रद्धालुभ्यश्च गतागते कापि असुविधा न भविष्यति।

## हिमाचले रेलतन्त्राय २९११ कोटिरूप्यकाणि स्वीकृतानि - अनुरागः

सांसदः अनुरागठाकुरः अवदत् यत् केन्द्रीय-आयव्ययपत्रे (बजट) २०२६-२७ मध्ये हिमाचलप्रदेशे रेलतन्त्रस्य विस्ताराय, सुरक्षायै, आधुनिकीकरणाय विद्युतीकरणाय च २९११ कोटिरूप्यकाणि (२९११ करोड़) स्वीकृतानि सन्ति। सम्प्रति राज्ये १७,७११ कोटिरूप्यकाणां रेलपरियोजनाः प्रचलन्त्यः सन्ति। एतदतिरिच्य 'अमृत स्टेशन योजना' अन्तर्गतं ४६ कोटिरूप्यकाणां व्ययेन प्रदेशस्य चत्वारि रेलाधिष्ठानानि (रेलवे स्टेशन) नूतनविधेन विकसितानि करिष्यन्ते।

# विश्वपर्यावरणदिवसस्य पूर्वसन्ध्यायां ‘संस्कृतवाङ्मये पर्यावरणचिन्तनम्’ इति विषये राष्ट्रियसङ्गोष्ठ्याः आयोजनम्



हिमसंस्कृतवार्ता विश्व मोहन झा दरभङ्गा, २ जूनमासः। ललितनारायणमिथिलाविश्वविद्यालयस्य स्नातकोत्तर-संस्कृतविभागस्य तथा च डॉ. प्रभातदास-फाउण्डेशन-इत्यस्य संयुक्ततत्वावधाने विश्वपर्यावरणदिवसस्य पूर्वसन्ध्यायाम् आगामी-जूनमासस्य ४ दिनाङ्के पूर्वाह्णे सार्ध-एकादशवादने (११:३०) एका राष्ट्रियसङ्गोष्ठी आयोजयिष्यते। इयं सङ्गोष्ठी “संस्कृतवाङ्मये पर्यावरणचिन्तनम्” इति मुख्यविषये स्नातकोत्तर-संस्कृतविभागे प्रचल्यति। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य स्नातकोत्तर-वेदविभागस्य पूर्वप्रमुखाः डॉ. विनयकुमारमिश्रमहोद्याः उपस्थास्यन्ति।आयोजकैः ज्ञापितं यत् अस्यां सङ्गोष्ठ्यां कस्यापि विषयस्य शिक्षकाः, शोधार्थिनः, छात्राश्च निःशुल्करूपेण भागं ग्रहीतुं शक्नुवन्ति। कार्यक्रमस्यास्य मुख्यमुद्देश्यं संस्कृतसाहित्ये निहितस्य पर्यावरणीयचिन्तनस्य तस्य आधुनिकसन्दर्भाणां च उपरि विमर्शं प्रोत्साहयितुमस्ति।सङ्गोष्ठ्याः रूपरेखां सज्जीकर्तुं संस्कृतविभागाध्यक्षस्य डॉ. कृष्णकान्तझामहोदयस्य अध्यक्षतायाम् एका उपवेशनगोष्ठी आयोजिता। अस्यां गोष्ठ्याम् संयोजकः डॉ. आर. एन. चौरसिया, डॉ. प्रभातदास-फाउण्डेशनस्य सचिवः मुकेशकुमारझा, दर्शनशास्त्रविभागाध्यक्षा डॉ. शिखरवासिनी, शोधार्थी प्रियङ्कासरकारः, कर्मचारिणी मञ्जु अकेला, योगेन्द्रपासवानः, उदयकुमारउदेशः इत्यादयः सदस्याः समुपस्थिताः आसन्।

# भारतीय- रेडक्रॉस- सोसायटी, मध्यप्रदेश- राज्यशाखया आचरितः "सेवादिवसः"

हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः। भारतीय- रेडक्रॉस- सोसायटी, मध्यप्रदेश- राज्यशाखया प्रतिवर्षं जूनमासस्य प्रथमदिने "सेवादिवसः" इति रूपेण आचर्यते। अस्मिन्नवसरे उज्जयिनीस्थ महर्षिपाणिनि- संस्कृत- वैदिक- विश्वविद्यालयस्य माननीयकुलगुरुः प्रो. शिवशङ्करमिश्र- महोदयः सेवाभावनां मानवतां च मूर्तरूपेण प्रदर्शयन् एकस्याः वृद्धमातुः कृते मासैकपर्यन्तं पर्याप्तां खाद्यसामग्रीं प्रदत्तवान्।अस्मिन् प्रसङ्गे प्रो. मिश्रमहोदयेन उक्तं यत् समाजस्य वञ्चितानां आवश्यकताग्रस्तानां जनानां सहाय्यकरणं प्रत्येकस्य नागरिकस्य नैतिकं कर्तव्यं वर्तते। सेवाकार्यैः समाजे सहयोगभावना मानवीयमूल्यानां च सम्वर्धनं भवति।अस्मिन् सेवाकार्यक्रमे डॉ. अखिलेशकुमारद्विवेदी, डॉ. शुभमशर्मा, डॉ. अजराठी, डॉ. रघुवीरपटेलश्च विशेषरूपेण उपस्थिताः आसन्। उपस्थितैः सर्वैरपि सेवादिवसस्य महत्त्वं प्रतिपादितं तथा समाजस्य सर्वेभ्यः वर्गेभ्यः आवश्यकताग्रस्तजनानां साहाय्यार्थं अग्रे आगन्तुम् आह्वानं कृतम्। अस्य कार्यक्रमस्य प्रमुखोद्देश्यः समाजे सेवा- परोपकार- भावनानां च संवर्धनं, आवश्यकता- ग्रस्तजनानां प्रति उत्तरदायित्वबोधस्य जागरणं च आसीत्।

# सक्षमाय, उत्तरदायित्वपूर्णाय, नियमानुकूलाय च प्रशासनाय अधिकारिणां प्राप्तं नवीनं 'सखित्वम्'



**हिमसंस्कृतवार्ता, राघवनाथ झा।** पाटलिपुत्रम्, २ जूनमासः (ज्येष्ठकृष्णद्वितीया, २०८३ विक्रमीयः)। बिहारसर्वकारस्य सामान्यप्रशासनविभागस्य मुख्यजाञ्चायुक्त-निदेशालयेन प्रकाशितायाः 'अखिलभारतीयसेवाऽधिकारिणाम् अनिवार्यसहचरः' इति पुस्तकस्य विमोचनं मङ्गलवासरे मुख्यसचिवालयस्य सभाकक्षे आयोजित-कार्यक्रमे राज्यस्य मुख्यसचिवेन प्रत्यय-अमृतमहोदयेन कृतम्। अस्मिन् अवसरे भारतीयप्रशासनिकसेवायाः अनेके वरिष्ठाः अधिकारिणः उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः सामान्यप्रशासनविभागस्य अपरमुख्यसचिवस्य बी. राजेन्द्रमहोदयस्य स्वागतभाषणेन अभवत्। ततः परं महानिदेशक-सह-मुख्यजाञ्चायुक्तः दीपककुमारसिंहः पुस्तकस्य परिचयं ददत् तस्याः उद्देश्यं उपयोगितां च प्राकाशयत्।तेन प्रतिपादितं यत् एषा पुस्तिका अखिलभारतीयसेवाक्षेत्रे नवयुक्तानां सेवारतानां च अधिकारिणां प्रशिक्षणाय, क्षमतावर्धनार्थं, तथा च अनुशासनिकप्रक्रियाणां प्रभावी-सञ्चालनाय विशेषरूपेण सज्जीकृता अस्ति। अस्यां पुस्तिकायां लोकसेवा-सम्बद्धाः संविधानानुशासनानि, अखिलभारतीयसेवा (अनुशासनं तथा च पुनर्याचना) नियमावली-१९६९ (एकोनसप्तत्युत्तर-एकोनविंशतिशततमीयवर्षीया), अखिलभारतीयसेवा (आचरण) नियमावली-१९६८ (अष्टषष्ट्युत्तर-एकोनविंशतिशततमीयवर्षीया), अभियोजन-स्वीकृति-सम्बद्धाः नियमाः, एकवातायनप्रणाल्याः अन्तर्गतं पुनर्याचना-पुनरीक्षणादिभिः सम्बद्धाः नवीनाः परिपत्राः, प्रमुखाः न्यायिकनिर्णयाः च संकलिताः सन्ति।मुख्यसचिवः प्रत्यय-अमृतः पुस्तकस्य विमोचनं कुर्वन् इमां प्रशासनिक-अधिकारिणां कृते एकं महत्त्वपूर्णं सन्दर्भग्रन्थं न्यरूपयत्। तेन उक्तं यत् एषः सङ्ग्रहः अधिकारिणां सेवाधर्माणां, अनुशासनिकप्रक्रियाणां, प्रशासनिकनिर्णयानां च अवबोधने महदाधारः भविष्यति। मुख्यजाञ्चायुक्त-निदेशालयस्य दलस्य कार्याणां प्रशंसां कुर्वन् सः अवदत् यत्—अयं प्रयासः दस्तावेजीकरणस्य, प्रशिक्षणस्य, क्षमतानिर्माणस्य च दिशि अतीव उपयोगी अस्ति, तथा च आगामि-प्रशासनिक-पीढ्यै मार्गदर्शकः सिद्धो भविष्यति।

कार्यक्रमस्य अन्ते सामान्यप्रशासनविभागस्य सचिवः मोहम्मद-सोहेलमहोदयः धन्यवादज्ञापनम् अकरोत्। तेन पुस्तकप्रकाशनं प्रशासनिकक्षमतावर्धनस्य क्षेत्रे एकं महत्त्वपूर्णं सोपानं प्रतिपादितम्।

अस्मिन् माङ्गलिके अवसरे आरक्षिमहानिदेशकः विनयकुमारः, विकासआयुक्तः मिहिरकुमारसिंहः, प्रधानमुख्यवनसंरक्षकः अरविन्दरसिंहः इत्यादयः राज्यस्य अनेके मूर्धन्याः अधिकारिणः समुपस्थिताः आसन्।

# भूमिहीनेभ्यः आवासभूमेः प्रदानं सर्वकारस्य सर्वोच्चप्राथमिकता : दिलीपजायसवालः



**हिमसंस्कृतवार्ता, राघवनाथ झा।** पाटलिपुत्रम्, २ जूनमासः (ज्येष्ठकृष्णद्वितीया, २०८३ विक्रमीयः)। राजस्व-एवं-भूमिसुधारमन्त्री दिलीपकुमारजायसवालः मण्डलाधिकारिणः (जिलाधिकारिणः) निर्देशितवान् यत् 'अभियान बसेरा-२' (आवास-अभियान-द्वितीयचरणम्) इत्यस्य अन्तर्गतं राज्यस्य सर्वेभ्यः भूमिहीनपरिवारेभ्यः शीघ्रमेव आवासयोग्या भूमिः उपलब्धनीया। तेन उक्तं यत् अञ्चलाधिकारिणः स्वक्षेत्रेषु भूमिहीनपरिवाराणां परिचयम् अन्विष्य तेभ्यः भूमिप्रदानप्रक्रियाम् आशु कुर्युः, तथा च अस्मिन् विषये शपथपत्रं स्वीकृत्य मुख्यकार्यालयं प्रति प्रेषयेयुः।मङ्गलवासरे दूरसंभाषण-दृश्यश्रव्यमाध्यमेन (वीडियो कॉन्फ्रेंसिंग द्वारा) शिवहर-सिवान-बेगूसराय-मण्डलानां राजस्वकार्याणां समीक्षां कुर्वन् मन्त्री अवदत् यत् अचिरान् जातेन कर्मकर-विरामेण (हड़ताल) यानि कार्याणि विलम्बितानि आसन्, तेषां निस्तारणाय अधिकारिभिः अतिरिक्तकार्यक्षमतेया सह कार्यं करणीयम्। नामान्तरणम् (दाखिल-खारिज), त्रुटिसुधारः (परिमार्जन), विद्युन्मानचित्रणम् (ई-मापी) च इत्यादयः जनसामान्यानां सर्वे अपि विषयाः समयबद्धरूपेण निर्णीताः भवेयुः।सहयोगशिविरेषु प्राप्तानाम् आवेदनानां समीक्षावसरे मन्त्रिणा निर्देशितं यत् किमपि आवेदनं निरस्तं (अस्वीकृतं) करणात् पूर्वं सम्बद्धेन आवेदकेन सह वार्तालापः अवश्यं करणीयः। अनेन आवेदकः स्वपक्षं उपस्थापयितुं अवसरं प्राप्स्यति, प्रशासनं प्रति च तस्य विश्वासः दृढो भविष्यति।सिवानमण्डलस्य समीक्षाकाले तेन आगामि-पञ्चदशदिनानि यावत् सर्वान् अञ्चलाधिकारिणः सायङ्काले षड्वादनतः अष्टवादनपर्यन्तं विशेषशिविरमाध्यमेन (कैम्प मोड) कार्यं कृत्वा प्रलम्बित-आवेदनानां निवारणं कर्तुं समादिष्टम्। अपि च मण्डलाधिकारिणं प्रति अञ्चलाधिकारिभिः निस्तारितेषु प्रकरणानां मध्ये पञ्च-पञ्च प्रकरणानां सूक्ष्मजाञ्चं कृत्वा विवरणं प्रेषयितुम् उक्तवान्।महाराजगञ्जे भूमिमापनकार्यस्य मन्दप्रगतिं दृष्ट्वा मन्त्री असन्तोषं प्रकटितवान्, सम्बद्धानां भूमिमापकानां (अमीनानाम्) कार्याणां जाञ्चं कृत्वा आवश्यककार्रवाई कर्तुं च आदिष्टवान्। तेन प्रवर्तिं यत् सर्वकारस्य प्राथमिकता राजस्वसेवाः पारदर्शिन्यः, प्रभावशालिन्यः, जनोन्मुख्यः च विधातुम् अस्ति, अत्र कस्यापि स्तरस्य उपेक्षा क्षम्या न भविष्यति।

मन्त्रिणा सचेतितं यत् पञ्चदशदिनानां पश्चात् पुनः समीक्षा भविष्यति, यदि च विलम्बितप्रकरणानां निस्तारणे अपेक्षिता प्रगतिः न दृश्येत, तर्हि दोषार्हाणाम् अधिकारिणां विरुद्धं दण्डात्मिका प्रक्रिया आरप्स्यते।अस्यां समीक्षागोष्ठ्याम् विभागीयसचिवः जयसिंहः, सचिवायनी सीमात्रिपाठी, सम्बद्धानां मण्डलानां मण्डलाधिकारिणः, अपरसमाहर्तारः, भूमिसुधार-उपसमाहर्तारः, अञ्चलाधिकारिणः च उपस्थिताः आसन्। बेगूसरायमण्डलस्य समीक्षावसरे स्थानीयविधायकाः विधानपरिषदः सदस्याश्च अपि उपस्थिताः आसन्।

# इक्षुकृषकाणां समस्यासमाधाने सर्वकारः प्रतिबद्धः : विजयकुमारसिंहः




**हिमसंस्कृतवार्ता, राघवनाथ झा।** बिहार-शर्कराशाला-सङ्घस्य (BSMA) एकं प्रतिनिधिमण्डलम् उपमुख्यमन्त्रिणं कृषिमन्त्रिणं च विजयकुमारसिंहमहोदयम् उपगम्य राज्यस्य इक्षुकृषकाणां विविधसमस्याभिः सम्बद्धं ज्ञापनपत्रं समर्पितवत्। प्रतिनिधिमण्डलस्य नेतृत्वं संस्थायाः सचिवः नरेशभट्टः अकरोत्। ज्ञापनपत्रे निवेदितं यत् बिहारराज्यस्य दशसु कार्यरतासु शर्कराशालासु प्रायः द्विलक्षपञ्चाशत्सहस्राः (२,५०,०००) कृषकाः आश्रिताः सन्ति, प्रायः सार्धद्विलक्षहेक्टेयर् (सार्धद्विलक्ष-शतमान-परिमित-भूभागः अथवा सार्धद्विलक्ष-'हेक्टेयर') क्षेत्रे इक्षुकृषिः क्रियते। सम्प्रति इक्षोः वर्धनावस्थायां 'यूरिया'-(सस्योपकारक)-उर्वरकस्य आवश्यकता अधिका वर्तते, किन्तु अनेकेषु क्षेत्रेषु तस्य उपलब्धौ कृषकाः काठिन्यम् अनुभवन्ति। अपरञ्च, क्षेत्रेषु जलप्रवाहस्य (जलावरोधस्य) समस्यया अपि कृषिः प्रभाविता अभवत्।विषयस्य गाम्भीर्यं विचार्य कृषिमन्त्री विजयकुमारसिंहः अवदत् यत् राज्ये उर्वरकाणां कापि न्यूनता नास्ति। तेन कृषि विभागस्य प्रधानसचिवः कृषिनिदेशकश्च निर्देशितौ यत् इक्षुकृषकाणां तथा शर्कराशाला-क्षेत्राणां कृते 'यूरिया'-उर्वरकस्य पर्याप्तोपलब्धिः प्राथमिकतया सुनिश्चितीक्रियताम्, येन कृषकाः कस्यापि प्रकारस्य कष्टं न प्राप्नुयुः।


मन्त्रिणा कृषकाः मृत्तिकापरीक्षणस्य आधारेण सन्तुलित-उर्वरकप्रयोगं कर्तुं तथा जैविक-प्राकृतिक-खादानां उपयोगं वर्धयितुं प्रेरिताः। तेन उक्तं यत् रासायनिक-उर्वरकेषु अतिनिर्भरता न्यूनीकर्तव्या, प्राकृतिककृषेः दिशि गमनमेव समयस्य आवश्यकता वर्तते। जलावरोधस्य (जलजमाव इति) समस्याविषये सः अवदत् यत् लघुजलसंसाधनविभागेन सह समन्वयं स्थापयित्वा जलनिर्गमस्य प्रभावी व्यवस्था कारयिष्यते। अस्य कृते कृषि-लघुजलसंसाधन-तथा सहकारिता-विभागानां अधिकारिणां संयुक्तोपवेशनं (बैठक) शीघ्रमेव आहूय स्थायिसमाधानस्य उपायाः सुनिश्चिताः भविष्यन्ति।

विजयकुमारसिंहः उक्तवान्—"कृषकाणां समस्यासमाधानम् अस्माकं सर्वोच्चप्राथमिकता अस्ति। प्रधानमन्त्रिणः नरेन्द्रमोदिनः तथा मुख्यमन्त्रिणः सम्राट्-चौधरी-महोदयस्य च नेतृत्वे सर्वकारः कृषकहितसंरक्षणाय पूर्णतया प्रतिबद्धः अस्ति। कृषकाः कस्यापि स्तरे पीडिताः न भविष्यन्ति, यूरिया-उपलब्धता तथा जलावरोधादि-समस्याः समयबद्धरूपेण समाधास्यन्ते।"प्रतिनिधिमण्डलेन कृषकहितसम्बद्ध-विषयेषु शीघ्र-संज्ञानग्रहणाय तथा सकारात्मकप्रयासाय कृषिमन्त्रिणं प्रति कृतज्ञता प्रकटीकृता।

# शेखपुरामण्डलाय चिकित्सामहाविद्यालयस्योपहारः, त्रिंशद्दिनेषु समस्यायाः अनिस्तारणे अधिकारिणः निलम्बिताः भविष्यन्ति : मुख्यमन्त्री




**हिमसंस्कृतवार्ता, राघवनाथ झा**।.शेखपुरा, २ जूनमासः (ज्येष्ठकृष्णद्वितीया, २०८३ विक्रमीयः)।शेखपुरामण्डलस्य बरबीघा-प्रखण्डे सामस-बुजुर्ग-पञ्चायते आयोजिते सहयोगशिविरे मुख्यमन्त्रिणा विकास-सुशासन-उत्तरदायित्वविषयेषु अनेकाः महत्त्वपूर्णाः घोषणाः कृताः। अस्मिन् मङ्गलमये अवसरे तेन पञ्चाशत्कोटि (५०,००,००,०००) रुप्यकाणाम् अपेक्षया अधिकव्यययुक्तानां द्विषष्टिः (६२) विकासयोजनानाम् उद्घाटनं शिलान्यासश्च कृतः, तथा च जनसामान्यैः सह साक्षात् संवादं कृत्वा तेषां कष्टानि श्रुतानि।मुख्यमन्त्रिणा प्रतिपादितं यत् सर्वकारः इदानीं जनतां कार्यालयाणां परिक्रमा न कारयिष्यति, अपितु स्वयं ग्रामं प्राप्य विकासं सेवाश्च प्रदास्यति। तेन घोषितं यत् शेखपुरामण्डले शीघ्रमेव चिकित्सामहाविद्यालयस्य चिकित्सालयस्य च शिलान्यासः विधास्यते, येन मण्डले स्वास्थ्यसुविधानां महत्तरः विस्तारः जनिष्यते।कार्यक्रमे मुख्यमन्त्री कष्टनिवारणप्रणालीं प्रति तीक्ष्णं सन्देशं ददत् अवदत् यत्—आवेदनप्राप्त्यनन्तरं त्रिंशद्दिनानाम् (३०) अभ्यन्तरे समाधानं अनिवार्यं भविष्यति। तेन स्पष्टीकृतं यत् दशसु दिनेषु कार्याचरणाभावे प्रथमं सूचनापत्रम्, एकविंशतितमे दिने द्वितीयं सूचनापत्रम्, पञ्चविंशतितमे दिने च अन्तिमा चेतावनी प्रदास्यते; यदि च त्रिंशत्सु दिनेषु निवारणं न भवेत्, तर्हि सम्बद्धः अधिकारी स्वतः एव निलम्बितः मन्स्यते। मुख्यमन्त्रिणा उक्तं यत् एषा व्यवस्था देशे अभिनवा अस्ति, अस्याः मुख्यमुद्देश्यं प्रशासनं पूर्णतया उत्तरदायित्वपूर्णं विधातुम् अस्ति।शिक्षाक्षेत्रे सुधाराय तेन उद्घोषितं यत् महिलाशिक्षिकाणां पदस्थापनं तासां पञ्चायतस्य समीपे तथा च पुरुषशिक्षकाणां पदस्थापनं प्रखण्डस्तरस्य परितः एव विधास्यते। इयं प्रक्रिया जूनमासस्यान्ते यावत् पूर्णकर्तुं लक्ष्यं निर्धारितम् अस्ति।स्वास्थ्यव्यवस्थां सुदृढीकर्तुं तेन प्रतिपादितं यत् आगामी-अगस्तमासस्य पञ्चदशदिनाङ्कं (१५ अगस्त) यावत् निरर्थक-रोगीप्रेषणप्रवृत्तौ अवरोधः विधास्यते, रोगिणां कृते स्थानीयस्तरे एव चिकित्सा-व्यवस्था दृढा कारयिष्यते।धार्मिक-सांस्कृतिक-विकासान्तर्गतं मुख्यमन्त्रिणा विष्णोधाममन्दिरस्य विकासकार्याणां निरीक्षणं कुर्वन् उक्तं यत् अस्य कृते आवश्यकानि सर्वाणि संसाधनानि सर्वकारः प्रदास्यति। मन्दिरपरिसरे अतिथिगृहम्, प्रसादविपणयः, वाहनस्थानम्, परिक्रमापथः, सौन्दर्यीकरणं च इत्यादयः प्रकल्पाः प्रचलन्तः सन्ति।एतदतिरिच्य तेन राज्ये आदर्शविद्यालयाः, पञ्चविंशत्युत्तर-एकशतम् (१२५) एककपरिमितं निःशुल्क-विद्युद्योजना, सौर-ऊर्जा-विस्तारः, नवीनाः नगरपरियोजनाः, मार्गसम्पर्कविस्तारः, महिला-रोजगारयोजनाः च विकासस्य प्राथमिकता इति गणिताः।अस्मिन् कार्यक्रमे द्विषष्टियोजनानाम् अन्तर्गतं एकपञ्चाशत् (५१) उद्घाटानि तथा एकादश (११) शिलान्यासाः समाविष्टाः आसन्। अस्मिन् महति अवसरे समाजकल्याणमन्त्री सह मण्डलस्य प्रभारिमन्त्री डॉ. श्वेतागुप्ता, अनेके विधायकाः, संसत्सदस्याः, वरिष्ठाः अधिकारिणः, उपस्थिता आसन्।




# संस्कृतं मधुरं सदा -४५

अस्माकं सनातनहिन्दुपरम्परायां, संस्कृतवाङ्मयार्णवे प्राचीनग्रन्थानाम् एकः महान् राशिः उपलभ्यते। वेदोपनिषदादयः नैके शास्त्रग्रन्थाः विराजमानाः सन्ति। एतेषु ग्रन्थेषु भगवद्गीतासदृशः तत्त्वज्ञानप्रदः, मोक्षप्रदः च ग्रन्थः न भूतो न भविष्यति अस्मिन् धरातले। मनुष्यजीवनस्य पुरस्तात् आपतितानां समस्तसमस्यानां समाधानम् अस्मिन् ग्रन्थे उपलभ्यते। इहलोके, परलोके, सर्वत्र च मानवकल्याणाय एव गीतायाः परमं लक्ष्यमस्ति। गीतासाधनेन गतदिनेप्रभृति कति जनाः परमां सार्थकतां गताः इत्यस्य गणना न सम्भवति। अतः गीता हि मनुष्यस्य परमसम्पद् वर्तते, दुर्लभजीवनेऽस्मिन्।मोहकारणतः हि मनुष्यः किं कर्तव्यं किं न इति द्विविधायां निपतति। मनुष्यः आत्मकल्याणं तु इच्छति, परं मोहासक्तिकारणतः संसारे बद्धः भवति। शास्त्राज्ञानुसारं यदि स्वकर्तव्यस्य पालनं कुर्यात्, फलेषु निर्विकारत्वं गच्छेत् तर्हि सः द्विविधातः मुक्तिं प्राप्तुमर्हति। अन्तःकरणे शरीरं विनाशशीलम्, आत्मा च अविनाशी इति स्पष्टता आवश्यकी। लोकसङ्ग्रार्थं, शरीरयात्रार्थमपि समर्पणबुद्ध्या कर्म तु करणीयमेव। जडतातः सम्बन्धविच्छेदः यदा भवति तदा तत्त्वज्ञानं स्वयं प्राप्यते। मनुष्येषु समभावयुक्तः मनुष्यः श्रेष्ठः। समत्वं नाम योगः इति। वस्तुतः विश्वं हि भगवद्रूपं वर्तते। मनुष्यमात्रं भगवत्प्राप्तेः अधिकारी इति गीता वदति। गीतोक्तैः कर्मज्ञानभक्तियोगसाधनैः मनुष्यः ईश्वरसाक्षात्कारस्य पात्रं भवति इति गीतोपदेशः। सत्त्वं, रजः, तमः चेति प्रकृतितः समुद्भवाः त्रिगुणाः कथ्यन्ते। जीवः परमात्मनः अंशभूतः। स एतान् गुणान् धृत्वा प्रपञ्चे प्रवर्तते, रमते, खिन्नतां गच्छेद् वा। सत्त्वं सुखकारकं, रजः कर्मासक्त्यादिषु नियोजकं, तमश्च अज्ञानक्लेशादिकारकम्। एतैः गुणैः जीवः सदा आवृत्तो भवति। परन्तु परमात्मा एतेभ्यः सर्वथा मुक्तः, निष्कलङ्कश्च स्यात्सदैव। एते गुणा हि जीवस्य सदसत्सु योनिषु जन्मनः कारणं भवन्ति। कस्मिंश्चन जने यदा कदाचित् एतद्गुणत्रयं परस्परं न्यूनाधिक्यत्वेन तिष्ठति, अर्थात् परिवर्तते। अतः तस्य भावोऽपि तद्गुणानुसारं जायते। कथञ्चित् दैवात् वा कश्चन एतेभ्यो गुणेभ्यः पारं गच्छेत् तदा हि स परमात्मनम् अनुभवेत्, प्राप्नुयाद् वा। अन्यथा सः सदा गुणेषु हि ओतःप्रोतत्वेन तिष्ठेत्।

अत एते प्रकृतिगुणाः हि प्रपञ्चस्य परिचालकाः स्युः, परमात्मा चेदत्र निर्लिप्तः स्यात्। जीवः प्रकृतिपुरुषयोः मध्ये सन्तिष्ठते । एतादृशं महज्ज्ञानं केवलं श्रीमद्भगवद्गीतायां वर्तते, येन च मनुष्यः अस्मिन् मनुष्यजन्मनि कृतकृत्यः भवति, धन्यताञ्च गच्छतीति, शुभम्।



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# सुखदं शान्तिदञ्चापि ऋतुषट्कं मनोहरम्

**वसन्तः-**
मलयपवनवेगाद्भाति रम्या धरित्री
कुसुमितचलवासैः पाटलैश्शोभतेऽपि।
सुरभितवकुलानां गन्धमाघ्राय मन्दं
कलयति किल कालः काकलीं सुप्रसन्नः।।

**ग्रीष्मः-**
तपनकिरणदीप्तौ चन्दनचर्चितान्तः
विहरति सरसारे चापयात्रासु कान्तः।
मलयपवनशान्ते दोलिकादोलदेवः
भवति सदयकायः प्रार्थितो वै सहायः।।

**वर्षाः-**
प्रथमप्रबलवृष्ट्या प्रस्रुतं शीतजालं
हृदयसुखकरं तन्मोदते सर्वलोकम्।
सरसि सरसि तोयं शोभते राजरागे
व्रतपरिणतलोका मोदकन्दं लभन्ते।

**शरत्-**
गगनगरणगाने गायका मेघशुभ्रा
विकसितकुमुदैश्च काशपुष्पैर्हसद्भिः।
धरणि धरति शोभां सर्वथाऽलौकिकां हि
शरदि भवति देवीपार्वणस्यापि कीर्तिः।।

**हेमन्तः-**
कनकसदृशसस्यैस्स्वर्णवर्णन्तु क्षेत्रं
पितृचरणचणानां पिण्डदानं प्रशस्तम्।
भवति गृहगृहेषु लक्ष्मीचित्रं विचित्रं
मधुरमधुरगन्धैः प्राप्नुमो मार्गशीर्षम्।।

**शिशिरः-**
हिमकरशिशिराद्रौ मन्दतापो विभाति
तरुणकिरणपाताद्रस्यते कामिनीभिः।
विविधरसनाहारः पर्वणाञ्चैव कालः
शयनभ्रमणलीलासम्भृतोऽयं सुचालः।।

सम्यक् साधु सुशोभनम् रुरुणा कविना कृतम्
यः पठेत्त्विदं काव्यं षड्तुमहिमान्वितम्।
सुखदं शान्तिदञ्चापि ऋतुषट्कं मनोहरम्
तस्य सर्वं भवेत्सौख्यं सत्यं शिवञ्च सुन्दरम्।।
इतिश्रीषड्तुविद्यायां मोदमोदनशास्त्रे
आचार्यरुरुकुमारवर्येण सम्भृतम् आनन्दकरम्
ऋतुषट्कं काव्यमिदं सानन्दं नन्दयतु
सुधीवृन्दमिति ॐ नमः ॐ

**रचयिता- आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

# केन्द्रसर्वकारेण लोखण्डे-प्रशान्तसीतारामः सीबीएसई संस्थायाः अध्यक्षपदे नियुक्तः



भारतीयप्रशासनिकसेवाश्रेण्याः (IAS) वरिष्ठः अधिकारी लोखण्डेप्रशान्तसीतारामः केन्द्रीयमाध्यमिकशिक्षाबोर्ड (CBSE) इत्यस्य नूतनः अध्यक्षः नियुक्तः अस्ति। श्रीसीतारामः अस्मात् पूर्वं गृहमन्त्रालये अपरसचिवरूपेण कार्यरतः आसीत्। सः श्रीराहुलसिंहस्य स्थानं स्वीकृतवान्, यस्य स्थानान्तरणम् कृषि-कृषककल्याणविभागे अपरसचिवपदे कृतम् अस्ति।सर्वकारेण श्रीवरुणभारद्वाजः सीबीएसई (CBSE) संस्थायाः सचिवपदे नियुक्तः। सः इतः पूर्वं उच्चतरशिक्षाविभागे निदेशकरूपेण कार्यं करोति स्म। सः श्रीहिमांशुगुप्तस्य स्थानं गृहीतवान्। मन्त्रिमण्डलस्य नियुक्तिसमित्या एतासां नियुक्तीनां स्वीकृतिः दत्ता अस्ति।

# संस्कृतम्, देवनागरी अक्षरपरम्परा

**भारतीयं शैलीविज्ञानम् अक्षरसौन्दर्यस्य च परम्परा**

भारतीयसंस्कृतौ अक्षरं केवलं लेखनस्य साधनं नास्ति, अपि तु तत् ज्ञानस्य, चेतनायाः, ध्वनेः, सौन्दर्यस्य, आध्यात्मिकतायाश्च प्रतीकमस्ति। भारतीये शैलीविज्ञाने (Indian Stylistics) अक्षरं दृश्यकला (Visual Art), ध्वनिसंरचना (Phonetic Structure), अर्थसंकेतः (Semantic Symbolism) तथा ब्रह्मतत्त्वरूपेण अवलोक्यते। अत एव भारतीयपरम्परायां "अक्षर" इति शब्दस्य अर्थः केवलं वर्णः न, किन्तु "अक्षयः" अर्थात् अविनाशितत्त्वमपि मन्यते।

भारतीयाक्षरसौन्दर्यस्य परम्परा विश्वस्य अन्याभ्यः लेखनपरम्पराभ्यः अस्मिन् विषये भिन्ना वर्तते यत् अत्र लेखनं केवलं सूचनाङ्कनस्य साधनं न, अपि तु आध्यात्मिक- सांस्कृतिक- सौन्दर्यात्मक- साधनारूपमस्ति। वैदिकमन्त्राणां ध्वनिसंरचना, ब्राह्मीलिपेः रेखात्मकसरलता, देवनागर्याः सममितिसंरचना, सिद्धलिपेः आध्यात्मिकाकृतयः, ताडपत्रपरम्परायाः गोलाकारलिपयः, सुलेखपरम्परा च एतानि सर्वाणि भारतीये शैलीविज्ञाने अक्षरसौन्दर्यस्य दीर्घां परम्परां प्रकाशयन्ति।

## १. अक्षरसौन्दर्यस्य अवधारणा

भारतीयपरम्परायाम् अक्षरं त्रिषु स्तरेषु विविच्यते-१. ध्वनिः (शब्दः)२. रूपम् (लिपिः) ३. तत्त्वम् (अर्थः)

अतः अक्षरस्य सौन्दर्यं केवलं तस्य आकारे न निहितम्, अपि तु- तस्य ध्वनौ,तस्य लये तस्य दृश्यसंरचनायाम्, तस्य आध्यात्मिकसंकेते च निहितम् अस्ति।

भारतीये शैलीविज्ञाने अक्षरसौन्दर्यस्य आधारः "शब्दब्रह्म" इति अवधारणा अस्ति। वेदेषु वाक् देवीरूपेण स्वीकृता- "वागेव विश्वभुवनी।"

अर्थात् अक्षरं केवलं संकेतः न, किन्तु चेतनायाः प्रत्यक्षप्रकाशः।

## २. भारतीयशैली-विज्ञानस्य पृष्ठभूमिः

भारतीय- शैलीविज्ञानस्य विकासः निम्नपरम्पराभ्यः अभवत्-

• वैदिकध्वनिविज्ञानम् • व्याकरणम्
• निरुक्तम् • छन्दःशास्त्रम् • काव्यशास्त्रम्
• लिपिविज्ञानम् • नाट्यशास्त्रम्

एतेषु सर्वेषु अक्षरस्य संरचनायाः प्रभावस्य च सूक्ष्मम् अध्ययनं कृतम्।

## ३. वैदिकपरम्परा तथा ध्वनिसौन्दर्यम्

भारतीयाक्षरसौन्दर्यस्य मूलचेतना वैदिकपरम्परायामेव निहिता अस्ति। वेदेषु ध्वनेः शुद्धता सर्वोपरि मन्यते स्म।अत एव- उदात्तः, अनुदात्तः, स्वरितः इति स्वरचिह्नानि विकसितानि। एतदेव ध्वनिसौन्दर्यं पश्चात् लिपिसौन्दर्यस्य आधाररूपेण अभवत्।

## ४. अक्षरम् आध्यात्मिकता च

भारतीयदर्शनेषु अक्षराणि दिव्य- शक्तिरूपेण स्वीकृतानि।

(क) ॐकारस्य सौन्दर्यम् "ॐ" केवलं ध्वनिः न, अपितु दृश्यप्रतीकमपि अस्ति।

तस्य आकारे- वक्रता, सन्तुलनम्, ऊर्ध्वगामिता च अद्भुतरूपेण समन्वितानि दृश्यन्ते। (ख) मन्त्राः अक्षराणि च बीजमन्त्रेषु अक्षराणि स्वयमेव शक्तिरूपेण मन्यन्ते-ह्रीं, श्रीं, क्लीं।

एतेषां सौन्दर्यं केवलं दृश्यं न, अपितु स्पन्दनात्मकं (Vibrational) अपि अस्ति।

## ५. ब्राह्मीलिपिः तथा रेखात्मकसौन्दर्यम्

ब्राह्मीलिपिः भारतीयाक्षरसौन्दर्यस्य आधारशिला अस्ति।

तस्याः प्रमुखविशेषताः- • सरलता • सन्तुलनम् • स्पष्टता • रेखात्मका- नुशासनम्। ब्राह्मीलिपौ अनावश्य- कालङ्कारस्य अभावः आसीत्। तस्याः सौन्दर्यं "सरलसंरचनायाम्" एव निहितम्।

Writing

## ६. गुप्तकालः तथा अक्षरलालित्यम्

गुप्तकाले अक्षराणांकलात्मकता अधिका अभवत्।

प्रमुखपरिवर्तनानि-• सरलरेखासु वक्रतायाः समावेशः• आकृतिषु कोमलता• सन्तुलितविन्यासः• सौन्दर्यपूर्णः प्रवाहः

अस्मिन्नेव काले अक्षराणि केवलं लेखनचिह्नानि न सन्ति स्म, अपि तु कलात्मकस्वरूपमपि धारयितुम् आरब्धवन्ति।

## ७. देवनागरी तथा दृश्यसममितिः

देवनागरी भारतीयाक्षरसौन्दर्यस्य अत्यन्तं विकसितव्यवस्था अस्ति।

तस्याः सौन्दर्यविशेषताः-

(१) शिरोरेखाशब्दानां दृश्यात्मकैक्यं निर्माति।

(२) ऊर्ध्वाधरसन्तुलनम्-प्रत्येकस्य अक्षरस्य ज्यामितीयसन्तुलनं स्पष्टतया दृश्यते।

(३) वक्ररेखयोः समन्वयः- क्षैतिजरेखा, ऊर्ध्वाधररेखा,गोलाकारवक्रता च मिलित्वा सौन्दर्यपूर्णां संरचनां निर्माति।

## ८. दक्षिणभारतीयलिपयः तथा गोलाकारसौन्दर्यम्

तमिळ्, मलयाळम्, तेलुगु तथा कन्नडलिपिषु गोलाकारता प्रमुखरूपेण दृश्यते।

तस्य कारणम्-ताडपत्रेषु लेखनकाले दीर्घाः सरला रेखाः पत्राणि भिन्द्युः इति। अतः गोलाकारलेखनशैली विकसिताभवत्। एवं लेखनसामग्री अपि शैलीनिर्माणे प्रभावं न्यधात्।

## ९. सिद्धलिपिः तथा आध्यात्मिकसौन्दर्यम्

सिद्धलिपेः स्वरूपम् अत्यन्तं कलात्मकं ध्यानात्मकं च अस्ति।

सा बौद्धमन्त्रपरम्परया सह सम्बद्धा आसीत्।

तस्याम् अक्षरेषु-

• मण्डलीयप्रवाहः• वक्रात्मकशक्तिः
• ध्यानात्मकसंरचनास्पष्टतया दृश्यते।

१०. सुलेखपरम्परा

भारतीयसंस्कृतौ सुलेखः (Calligraphy) केवलं लेखनकला न, अपितु साधनारूपेण स्वीकृतः।तस्य प्रमुखविशेषताः-

• अक्षरानुपातः• रेखासन्तुलनम्• लयात्मकता• दृश्यसङ्गीतात्मकता धार्मिकसुलेखः, मन्त्रलेखनम्, यन्त्रनिर्माणम्, जैनपाण्डुलिपयः, बौद्धसूत्राणि च सर्वत्र अक्षरसौन्दर्यस्य सूक्ष्मप्रयोगः दृश्यते।

## ११. पाण्डुलिपिपरम्परा तथा शैली

भारतीयपाण्डुलिपिषु अक्षराणां विन्यासः अत्यन्तं कलात्मकः आसीत्।

प्रमुखतत्त्वानि-• रक्तवर्णीयशीर्षकाः
• सुवर्णमसि • सीमाङ्कनम्
• अलङ्कृतप्रारम्भाक्षराणि • चित्रात्मकसंयोजनम्

अत्र अक्षराणि चित्राणि च परस्परं पूरकत्वेन स्थितानि।

## १२. अक्षरसौन्दर्यं काव्यशास्त्रं च

भारतीयकाव्यशास्त्रे अपि अक्षरसौन्दर्यस्य विशेषमहत्त्वम् अस्ति।

**अनुप्रासः**ध्वनिसौन्दर्यस्य अक्षरीयरूपम्। **यमकम्** -शब्दसंरचनायाः दृश्यात्मकपुनरावृत्तिः। **छन्दः**-अक्षराणां गणितीयलयः।

## १३. अक्षरसौन्दर्यं गणितं च

भारतीयाक्षरेषु ज्यामितीयानुशासनं स्पष्टं दृश्यते। विशेषतः देवनागर्यां- • रेखीयसन्तुलनम् • सममितिः • अनुपातः • वक्रविन्यासः इत्येतानि गणितीयसंरचनायाः दर्शनं कुर्वन्ति।

## १४. अक्षरसौन्दर्यं मनोविज्ञानं च

अक्षराणां दृश्यप्रभावः मनोवैज्ञानिकः भवति।

उदाहरणतः- अक्षररूपम्, मनोवैज्ञानिकप्रभावः गोलाकारता, कोमलता, कोणीयता, औपचारिकता, स्थूलरेखा, शक्तिः सूक्ष्मरेखा, विद्वत्ता, भारतीयं शैलीविज्ञानम् एतान् प्रभावान् अप्रत्यक्षरूपेण स्वीकरोति।

## १५. भारतीयशैलीविज्ञानं दृश्यभाषा च

भारतीयाक्षराणि दृश्यभाषारूपेण अपि कार्यं कुर्वन्ति।

यथा-• ॐ• स्वस्तिकम्• यन्त्राक्षराणि
• बीजाक्षराणि। एतेषामर्थः केवलं भाषिकः न, अपि तु प्रतीकात्मकः अपि अस्ति।

## १६. अक्षरसौन्दर्यं सांस्कृतिकपरिचयश्च

प्रत्येका भारतीयलिपिः स्वीयां सांस्कृतिकपहचानं वहति।

• बाङ्ग्लालिपिः- कोमलसाहित्यिकता
• गुरुमुखीलिपिः- आध्यात्मिकानुशासनम्
• तमिळ्लिपिः- प्राचीनद्राविडपरम्परा
• देवनागरी- संस्कृतकेन्द्रिता ज्ञानपरम्परा

## १७. आधुनिकटाइपोग्राफी तथा भारतीयाक्षराणि

डिजिटलयुगे भारतीयाक्षरसौन्दर्यं नवीनाः चुनौतयः अनुभवति।

**समस्याः** • फॉन्टसरलीकरणम्
• संयुक्ताक्षराणां लोपः • दृश्यसन्तुलनम्

**सम्भावनाः**- यूनिकोडाधारितसंरक्षणम्, डिजिटलसुलेखः, कृत्रिमबुद्धिमत्त्याधारित- टाइपविन्यासः अस्ति।....

सुधा साठये, मुंबई
sudha_sathaye@yahoo.com

# "लौकिकन्यायकोशः"
# "अक्षिपात्रन्यायः"

धूलेः कश्चन कणः अपि नेत्रे गतः चेत् नेत्रे पीडा उत्पद्यते। मृदुस्वभावस्य भावनाप्रधानस्य वा जनस्य कृते अल्पा अपि पीडा असहनीया भवति इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। गतदिनेतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

गतदिने एका अद्भुता वार्ता मया श्रुता। एकेन विद्या-वाचस्पति- अनुसन्धात्रा दिवा नववादनतः सायं पञ्चवादनपर्यन्तं कार्यं क्रियते, ततः परं रात्रौ एकादशवादनपर्यन्तं द्विचक्रिका- भाटकवाहनं चाल्यते। सः एतेन परिश्रमेण स्वस्य महत् सामर्थ्यं ज्ञातवान् अस्ति। काव्या- सत्यम्, तेन परिश्रमेण अस्माकं कृते महती प्रेरणा दत्ता।

अन्या अपि अपूर्वा वार्ता सैन- फ्रान्सिस्को-नगरात् प्राप्ता। तत्र आयोजितः निःशुल्क- भारतीय- आम्रफल- महोत्सवः बहुभिः जनैः सानन्दम् उपभुक्तः। तेन महती जनसङ्ख्या आकृष्टा। नन्दिनी- अहो! स्वादिष्टानि आम्रफलानि तु सर्वेभ्यः सदा रोचन्ते।

अपरतः, अमेरिकादेशे एव एकया गर्भिण्या मार्गपार्श्वे एव शिशुः प्रसूतः। आपातकालीन- दूरवाणी- सहायकस्य निर्देशेन एतत् दुष्करं कार्यं सिद्धम्। परं महत् कौतुकम् एतत् यत्, तस्य सहायकस्य पुत्री अपि तस्मिन् एव दिने जाता।

**काव्या-** अहो आश्चर्यम्! दैवयोगः अतीव सुन्दरः अस्ति।

इदानीं यात्रा-वार्ता श्रूयताम्। पश्चिम-एशिया-क्षेत्रे अशान्तेः कारणात् उत्तरप्रदेशस्य प्रवासिभिः मरुदेशयात्रा त्यक्ता। तैः स्वदेशयात्रा अथवा यूरोपयात्रा वृता।

**नन्दिनी-** सत्यम्, प्रवासिभिः सर्वदा सुरक्षा एव प्रथमा मन्यते।

गतदिनेतनी वार्ता इत्थं समाप्ता। पुनर्मिलामः।